श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये त्रिनवतितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये त्रिनवतितमं दशकम् ॥

## गुरुशिक्षावर्णनम्

बन्धुस्नेहं विजह्यां तव हि करुणया त्वय्युपावेशितात्मा
सर्वं त्यक्त्वा चरेयं सकलमपि जगद्वीक्ष्य मायाविलासम्।
नानात्वाद्भ्रान्तिजन्यात् सति खलु गुणदोषावबोधे विधिर्वा
व्यासेधो वा कथं तौ त्वयि निहितमतेर्वीतवैषम्यबुद्धेः ॥ 93.1 ॥

क्षुत्तृष्णालोपमात्रे सततकृतधियो जन्तवः सन्त्यनन्ता -
स्तेभ्यो विज्ञानवत्त्वात् पुरुष इह वरस्तज्जनिर्दुर्लभैव।
तत्राप्यात्मात्मनः स्यात्सुहृदपि च रिपुर्यस्त्वयि न्यस्तचेता -
स्तापोच्छित्तेरुपायं स्मरति स हि सुहृत् स्वात्मवैरी ततोऽन्यः ॥ 93.2 ॥

त्वत्कारुण्ये प्रवृत्ते क इव नहि गुरुर्लोकवृत्तेऽपि भूमन्
सर्वाक्रान्तापि भूमिर्नहि चलति ततस्सत्क्षमां शिक्षयेयम्।
गृह्णीयामीश तत्तद्विषयपरिचयेऽप्यप्रसक्तिं समीरात्
व्याप्तत्वञ्चात्मनो मे गगनगुरुवशाद्भातु निर्लेपता च ॥ 93.3 ॥

स्वच्छः स्यां पावनोऽहं मधुर उदकवद्वह्निवन्मा स्म गृह्णां
सर्वान्नीनोऽपि दोषं तरुषु तमिव मां सर्वभूतेष्ववेयाम्।
पुष्टिर्नष्टिः कलानां शशिन इव तनोर्नात्मनोऽस्तीति विद्यां
तोयादिव्यस्तमार्ताण्डवदपि च तनुष्वेकतां त्वत्प्रसादात् ॥ 93.4 ॥

स्नेहाद्व्याधात्तपुत्रप्रणयमृतकपोतायितो मा स्म भूवं
प्राप्तं प्राश्नन् सहेय क्षुधमपि शयुवत् सिन्धुवत्स्यामगाधः।

मा पप्तं योषिदादौ शिखिनि शलभवत् भृङ्गवत् सारभागी
    भूयासं किन्तु तद्वद्धनचयनवशान्माहमीश प्रणेशम् ॥ **93.5** ॥

मा बद्ध्यासं तरुण्या गज इव वशया नार्जयेयं धनौघं
    हर्तान्यस्तं हि माध्वीहर इव मृगवन्मा मुहं ग्राम्यगीतैः।
नात्यासज्जेय भोज्ये झष इव बडिशे पिङ्गलावन्निराशः
    सुप्यां भर्तव्ययोगात् कुरर इव विभो सामिषोऽन्यैर्न हन्यै ॥ **93.6** ॥

वर्तेय त्यक्तमानः सुखमतिशिशुवन्निस्सहायश्चरेयं
    कन्याया एकशेषो वलय इव विभो वर्जितान्योन्यघोषः।
त्वच्चित्तो नावबुद्ध्यै परमिषुकृदिव क्ष्माभृदायानघोषं
    गेहेष्वन्यप्रणीतेष्वहिरिव निवसान्युन्दुरोर्मन्दिरेषु ॥ **93.7** ॥

त्वय्येव त्वत्कृतं त्वं क्षपयसि जगदित्यूर्णनाभात् प्रतीयां
    त्वच्चिन्ता त्वत्स्वरूपं कुरुत इति दृढं शिक्षये पेशकारात्।
विड्भस्मात्मा च देहो भवति गुरुवरो यो विवेकं विरक्तिं
    धत्ते सञ्चिन्त्यमानो मम तु बहुरुजापीडितोऽयं विशेषात् ॥ **93.8** ॥

ही ही मे देहमोहं त्यज पवनपुराधीश यत्प्रेमहेतो -
    र्गेहे वित्ते कलत्रादिषु च विवशितास्त्वत्पदं विस्मरन्ति।
सोऽयं वह्नेश्शुनो वा परमिह परतस्साम्प्रतं चाक्षिकर्ण -
    त्वग्जिह्वाद्या विकर्षन्त्यवशमत इतः कोऽपि न त्वत्पदाब्जे ॥ **93.9** ॥

दुर्वारो देहमोहो यदि पुनरधुना तर्हि निश्शेषरोगान्
    हृत्वा भक्तिं द्रढिष्ठां कुरु तव पदपङ्केरुहे पङ्कजाक्ष।
नूनं नानाभवान्ते समधिगतमिमं मुक्तिदं विप्रदेहं
    क्षुद्रे हा हन्त मा मा क्षिप विषयरसे पाहि मां मारुतेश ॥ **93.10** ॥

॥ इति श्रीमन्नारायणीये त्रिनवतितमं दशकं समाप्तम् ॥